श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ त्रयस्त्रिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रयस्त्रिंशः सर्गः ॥

## सरमया सीतायाः सान्त्वनं रावणमायाया रहस्योद्घाटनं श्रीरामागमनसम्बन्धिप्रियसंवादस्य निवेदनं तदीयविजयस्य समर्थनं च

सीतां तु मोहितां दृष्ट्वा सरमा नाम राक्षसी।
आससादाथ वैदेहीं प्रियां प्रणयिनी सखीम्॥ **6.33.1** ॥

मोहितां राक्षसेन्द्रेण सीतां परमदुःखिताम्।
आश्वासयामास तदा सरमा मृदुभाषिणी॥ **6.33.2** ॥

सा हि तत्र कृता मित्रं सीतया रक्ष्यमाणया।
रक्षन्ती रावणादिष्टा सानुक्रोशा दृढव्रता॥ **6.33.3** ॥

सा ददर्श सखी सीतां सरमा नष्टचेतनाम्।
उपावृत्योत्थितां ध्वस्तां वडवामिव पांसुषु॥ **6.33.4** ॥

तां समाश्वासयामास सखीस्नेहेन सुव्रताम्।
समाश्वसिहि वैदेहि मा भूत् ते मनसो व्यथा।
उक्ता यद् रावणेन त्वं प्रत्युक्तं च स्वयं त्वया॥ **6.33.5** ॥

सखीस्नेहेन तद् भीरु मया सर्वं प्रतिश्रुतम्।
लीनया गहने शून्ये भयमुत्सृज्य रावणात्।
तव हेतोर्विशालाक्षि नहि मे रावणाद् भयम्॥ **6.33.6** ॥

स सम्भ्रान्तश्च निष्क्रान्तो यत्कृते राक्षसेश्वरः।
तत्र मे विदितं सर्वमभिनिष्क्रम्य मैथिलि ॥ **6.33.7** ॥

न शक्यं सौप्तिकं कर्तुं रामस्य विदितात्मनः।
वधश्च पुरुषव्याघ्रे तस्मिन् नैवोपपद्यते ॥ **6.33.8** ॥

न त्वेवं वानरा हन्तुं शक्याः पादपयोधिनः।
सुरा देवर्षभेणेव रामेण हि सुरक्षिताः ॥ **6.33.9** ॥

दीर्घवृत्तभुजः श्रीमान् महोरस्कः प्रतापवान्।
धन्वी सन्नहनोपेतो धर्मात्मा भुवि विश्रुतः ॥ **6.33.10** ॥

विक्रान्तो रक्षिता नित्यमात्मनश्च परस्य च।
लक्ष्मणेन सह भ्रात्रा कुलीनो नयशास्त्रवित् ॥ **6.33.11** ॥

हन्ता परबलौघानामचिन्त्यबलपौरुषः।
न हतो राघवः श्रीमान् सीते शत्रुनिबर्हणः ॥ **6.33.12** ॥

अयुक्तबुद्धिकृत्येन सर्वभूतविरोधिना।
एवं प्रयुक्ता रौद्रेण माया मायाविना त्वयि ॥ **6.33.13** ॥

शोकस्ते विगतः सर्वकल्याणं त्वामुपस्थितम्।
ध्रुवं त्वां भजते लक्ष्मीः प्रियं ते भवति शृणु ॥ **6.33.14** ॥

उत्तीर्य सागरं रामः सह वानरसेनया।
सन्निविष्टः समुद्रस्य तीरमासाद्य दक्षिणम् ॥ **6.33.15** ॥

दृष्टो मे परिपूर्णार्थः काकुत्स्थः सहलक्ष्मणः।
सहितैः सागरान्तस्थैर्बलैस्तिष्ठति रक्षितः ॥ **6.33.16** ॥

अनेन प्रेषिता ये च राक्षसा लघुविक्रमाः।
राघवस्तीर्ण इत्येवं प्रवृत्तिस्तैरिहाहृता ॥ **6.33.17** ॥

स तां श्रुत्वा विशालाक्षि प्रवृत्तिं राक्षसाधिपः।
एष मन्त्रयते सर्वैः सचिवैः सह रावणः॥ **6.33.18**॥

इति ब्रुवाणा सरमा राक्षसी सीतया सह।
सर्वोद्योगेन सैन्यानां शब्दं शुश्राव भैरवम्॥ **6.33.19**॥

दण्डनिर्घातवादिन्याः श्रुत्वा भेर्या महास्वनम्।
उवाच सरमा सीतामिदं मधुरभाषिणी॥ **6.33.20**॥

सन्नाहजननी ह्येषा भैरवा भीरु भेरिका।
भेरीनादं च गम्भीरं शृणु तोयदनिःस्वनम्॥ **6.33.21**॥

कल्प्यन्ते मत्तमातङ्गा युज्यन्ते रथवाजिनः।
दृश्यन्ते तुरगारूढाः प्रासहस्ताः सहस्रशः॥ **6.33.22**॥

तत्र तत्र च सन्नद्धाः सम्पतन्ति सहस्रशः।
आपूर्यन्ते राजमार्गाः सैन्यैरद्भुतदर्शनैः॥ **6.33.23**॥

वेगवद्भिर्नदद्भिश्च तोयौघैरिव सागरः।
शस्त्राणां च प्रसन्नानां चर्मणां वर्मणां तथा॥ **6.33.24**॥

रथवाजिगजानां च राक्षसेन्द्रानुयायिनाम्।
सम्भ्रमो रक्षसामेष हृषितानां तरस्विनाम्॥ **6.33.25**॥

प्रभां विसृजतां पश्य नानावर्णसमुत्थिताम्।
वनं निर्दहतो घर्मे यथा रूपं विभावसोः॥ **6.33.26**॥

घण्टानां शृणु निर्घोषं रथानां शृणु निःस्वनम्।
हयानां हेषमाणानां शृणु तूर्यध्वनिं तथा॥ **6.33.27**॥

उद्यतायुधहस्तानां राक्षसेन्द्रानुयायिनाम्।
सम्भ्रमो रक्षसामेष तुमुलो लोमहर्षणम्॥ **6.33.28**॥

श्रीस्त्वां भजति शोकघ्नी रक्षसां भयमागतम्।
रामः कमलपत्राक्षो दैत्यानामिव वासवः॥ **6.33.29** ॥

अवजित्य जितक्रोधस्तमचिन्त्यपराक्रमः।
रावणं समरे हत्वा भर्ता त्वाधिगमिष्यति॥ **6.33.30** ॥

विक्रमिष्यति रक्षःसु भर्ता ते सहलक्ष्मणः।
यथा शत्रुषु शत्रुघ्नो विष्णुना सह वासवः॥ **6.33.31** ॥

आगतस्य हि रामस्य क्षिप्रमङ्कागतां सतीम्।
अहं द्रक्ष्यामि सिद्धार्थां त्वां शत्रौ विनिपातिते॥ **6.33.32** ॥

अस्राण्यानन्दजानि त्वं वर्तयिष्यसि जानकि।
समागम्य परिष्वक्ता तस्योरसि महोरसः॥ **6.33.33** ॥

अचिरान्मोक्ष्यते सीते देवि ते जघनं गताम्।
धृतामेकां बहून् मासान् वेणीं रामो महाबलः॥ **6.33.34** ॥

तस्य दृष्ट्वा मुखं देवि पूर्णचन्द्रमिवोदितम्।
मोक्ष्यसे शोकजं वारि निर्मोकमिव पन्नगी॥ **6.33.35** ॥

रावणं समरे हत्वा नचिरादेव मैथिलि।
त्वया समग्रः प्रियया सुखार्हो लप्स्यते सुखम्॥ **6.33.36** ॥

सभाजिता त्वं रामेण मोदिष्यसि महात्मना।
सुवर्षेण समायुक्ता यथा सस्येन मेदिनी॥ **6.33.37** ॥

गिरिवरमभितो विवर्तमानो हय इव मण्डलमाशु यः करोति।
तमिह शरणमभ्युपैहि देवि दिवसकरं प्रभवो ह्ययं प्रजानाम्॥ **6.33.38** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे त्रयस्त्रिंशः सर्गः॥